# HITOPADEŚA SET TEXT SELECTION, STORIES 4 - 6

## The story of a lion, a mouse and a cat

| | |
|---|---|
| उत्तरापथम् | northern region |
| शिखरः | peak |
| विक्रमः | courage |
| कन्दरः | cave |
| अधिशयान° | sleeping in |
| केसरः | mane |
| कश्चित् | some or other |
| छिनत्ति | nibbles |
| लून° | nibbled |
| बुद्ध्वा | having become aware |
| विवरः | hole |
| अन्तर्गत° | gone inside |
| अलभमान° | not finding |
| विधेय° | to be done |
| भवतु | so be it |
| क्षुद्र° | insignificant |
| भवेत् | might be |
| नम्यते | is bowed, overcome |
| निहन्तुम् | to kill |
| पुरस्कार्य° | should be put before |
| सदृश° | equal |
| आलोच्य | having considered |
| दधिः | milk or yoghurt |
| मांसम् | meat |
| संतोष्य | having satisfied |
| प्रयत्नात् | carefully |
| निःसरति | comes out |
| अक्षत° | not harmed |
| सविशेषम् | especially |
| संवर्धयति | makes happy |
| संचरन् | going |
| मार्जारः | cat |
| प्राप्त° | caught |
| अनन्तरम् | after that |
| उपयोगः | use |
| अभावः | absence |
| मन्दादर° | neglectful |
| निरपेक्ष° | free from need |
| कर्तव्य° | to be done |
| भृत्यः | servant |
| प्रभुः | master |
| स्यात् | would be |
| -वत् (end of a compound) | like |

## The Lion, the Mouse and the Cat

अस्त्युत्तरापथे ऽर्बुदशिखरनाम्नि पर्वते महाविक्रमो नाम सिंहः । तस्य पर्वतकन्दरमधिशयानस्य केसराग्रं मूषिकः कश्चिच्छिनत्ति । स सिंहः केसराग्रं लूनं बुद्ध्वा कुपितो विवरान्तर्गतं मूषिकमलभमानो ऽचिन्तयत् । किं विधेयमत्र । भवतु । एवं श्रूयते ।

क्षुद्रशत्रुर्भवेद्यस्तु विक्रमान्न स नम्यते ।
तं निहन्तुं पुरस्कार्यः सदृशस्तस्य सैनिकः ॥

इत्यालोच्य तेन ग्रामं गत्वा दधिकर्णनामा बिडालो मांसाद्याहारेण संतोष्य प्रयत्नादानीय स्वकन्दरे धृतः । ततस्तद्भयान्मूषिको बहिर्न निःसरति । तेनासौ सिंहो ऽक्षतकेसरः सुखं स्वपिति । मूषिकशब्दं यदा यदा शृणोति तदा तदा सविशेषं तं बिडालं मांसाहारदानेन संवर्धयति । अथैकदा स मूषिकः क्षुधा पीडितो बहिः संचरंस्तेन मार्जारेण प्राप्तो व्यापादितः खादितश्च । अनन्तरं स सिंहो यदा कदाचिदपि मूषिकशब्दं न शुश्राव तदोपयोगाभावात्तस्य बिडालस्याहारदाने मन्दादरो बभूव । अतो ऽहं ब्रवीमि ।

निरपेक्षो न कर्तव्यो भृत्यैः स्वामी कदा चन ।
निरपेक्षं प्रभुं कृत्वा भृत्यः स्याद्दधिकर्णवत् ॥

# The story of the birds and the apes

| | | | |
|---|---|---|---|
| नर्मदा | the river Narmadā | -मात्र° | only, merely (at the end of a compound) |
| उपत्यका | the land at the foot of a mountain | आहृत° | brought |
| शाल्मली | a tall, thorny tree with red flowers | संयुक्त° | provided with |
| निर्मित° | made, formed | अवसीदति | becomes disheartened |
| नीडम् | nest | अमर्षः | impatience, anger |
| क्रोडः | hollow | आलोचित° | thought |
| पक्षिन् (m) | bird | निर्वात° | sheltered from the wind |
| वर्षाः | the rains | गर्भः | interior |
| पटः | garment | निन्दति | blames |
| जलधरः | raincloud | उपशमः | stopping |
| पटलः | veil | शान्त° | ceased |
| आवृत° | covered | पानीयवर्षः | shower of rain |
| नभस्तलम् | sky | आरुह्य | having climbed |
| धारासारः | downpour | भग्न° | destroyed |
| वृष्टिः (f) | rain | अण्डम् | egg |
| वानरः | monkey | विद्वान् | learned man |
| -तले | under (at the end of a compound) | उपदेष्टव्य° | to be advised |
| अवस्थित° | standing, placed | उपदिशति | advises |
| शीत° | cold | अज्ञ° | foolish |
| आर्त° | afflicted | स्थानम् | abode, dwelling |
| अवलोक्य | having seen | भ्रंशः | ruin |
| भो भो | Oh! Oh! | ययुः | they went (perfect of याति) |

**The story of the birds and the apes**

अस्ति नर्मदातीरे पर्वतोपत्यकायां विशालः शाल्मलीतरुः । तत्र निर्मितनीडक्रोडे पक्षिणः सुखेन वर्षास्वपि निवसन्ति । अथ नीलपटैरिव जलधरपटलैरावृते नभस्तले धारासारैर्महती वृष्टिर्बभूव ।ततो वानरांस्तरुतले ऽवस्थितान्शीतार्तान्कम्पमानानवलोक्य पक्षिभिरुक्तम् । भो भो वानराः । श्रूयताम् ।

अस्माभिर्निर्मिता नीडाश्चञ्चुमात्राहृतैस्तृणैः ।
हस्तपादादिसंयुक्ता यूयं किमवसीदथ ॥

तच्छ्रुत्वा वानरैर्जातामर्षैरालोचितम् । अहो । निर्वातनीडगर्भावस्थिताः सुखिनः पक्षिणो ऽस्मान्निन्दन्ति । तद्भवतु । तावद्वृष्टेरुपशमः । अनन्तरं शान्ते पानीयवर्षे तैर्वानरैर्वृक्षमारुह्य सर्वे नीडा भग्नाः। तेषां पक्षिणामण्डानि चाधः पतितानि । अतो ऽहं ब्रवीमि ।

विद्वानेवोपदेष्टव्यो नाविद्वांस्तु कदा चन ।
वानराननुपदिश्याज्ञान्स्थानभ्रंशं ययुः खगाः ॥

# The priest with the goat, and the three rogues

| | |
|---|---|
| गौतम° | Gautama, name of a forest |
| प्रस्तुत° | begun |
| ब्राह्मणः | priest |
| छागः | goat |
| उपक्रीय | having bought |
| स्कन्धः | shoulder |
| धूर्तः | rogue |
| त्रयम् | triad, three of |
| अवलोकित° | (was) seen |
| मतिः (f.) | thought, wit |
| प्रकर्षः | superiority |
| प्रान्तरम् | a long road |
| णतले | under (at the end of a compound) |
| वर्त्मन् (n.) | roadway |
| स्थित° | stayed, waited |
| अभिहित° | said |
| किमिति | why |
| उह्यते | is carried |
| श्वन् | dog |
| अनन्तरम् | straight away |
| क्रोशमात्र° | calling distance |
| अवस्थित° | standing near, placed |
| आकर्ण्य | having heard |
| निधाय | having put down |
| मुहुर्मुहुः | repeatedly |
| निरीक्ष्य | having examined |
| दोलायमान° | wavering, doubting |
| चलित° | set off, departed |
| तदनन्तरम् | thereupon |
| निश्चितम् | certainly, decidedly |
| स्नात्वा | having bathed |
| ययौ | he went (perfect of याति) |
| नीत्वा | having (been) led, or brought |
| भक्षित° | (was) eaten |
| औपम्यम् | likeness |
| वेत्ति | knows, considers |
| वादिन् | speaker |
| वञ्च्यते | is deceived |

**The priest with the goat, and the three rogues**

अस्ति गौतमारण्ये प्रस्तुतयज्ञः कश्चिद्ब्राह्मणः । स च यज्ञार्थं ग्रामान्तराच्छागमुपक्रीय स्कन्धे कृत्वा गच्छन्धूर्तत्रयेणावलोकितः । ततस्ते धूर्ता यद्येष च्छागः केनाप्युपायेन प्राप्य खाद्यते तदा मतिप्रकर्षो भवतीत्यालोच्य प्रान्तरे वृक्षत्रयतले ब्राह्मणस्य वर्त्मन्युपविश्य स्थिताः । तत्रैकेन धूर्तेन स ब्राह्मणो गच्छन्नभिहितः । भो ब्राह्मण । किमिति त्वया कुक्कुरः स्कन्धेनोह्यते । ब्राह्मणो ब्रूते । नायं श्वा । यज्ञच्छागो ऽयं । अनन्तरं पुनर्द्वितीयेन क्रोशमात्रावस्थितेन तदेवोक्तम् । तदाकर्ण्य ब्राह्मणस्तं छागं भूमौ निधाय मुहुर्मुहुर्निरीक्ष्य पुनः स्कन्धे कृत्वा दोलायमानमतिश्चलितः । तदनन्तरं पनर्गच्छन्स ब्राह्मणस्तृतीयेन धूर्तेनोक्तः । भो ब्राह्मण । किमिति कुक्कुरं स्कन्धेन भवान्वहति । तदाकर्ण्य निश्चितमेवायं कुक्कुर इति मत्वा छागं त्यक्त्वा स्नात्वा स्वगृहं ययौ । स च्छागो तैर्धूर्तैर्नीत्वा भक्षितः । अतो ऽहं ब्रवीमि ।

आत्मौपम्येन यो वेत्ति दुर्जनं सत्यवादिनम् ।
स तथा वञ्च्यते धूर्तैर्ब्राह्मणश्छागतो यथा ॥